# भारतवन्दनगीतिका

पण्डितभूपतिभूषणमिश्रः

नौमि धर्मपालितं
सार्वभौमभारतं
मातृभूमि-मानधातृ-नेतृवृन्द-वन्दितम् ।। ध्रुवम् ।।

गाङ्गवारिपावितं साङ्गवेदनादितं
लोकतन्त्रशासितं सत्यमन्त्रमन्त्रितं
शान्तिपुष्पवासितं
त्यागभावभासितं
जाति-धर्म-सम्प्रदाय-भेदभाव-वर्जितम् ।।

अद्रिराजराजितं यज्ञधूमपावितं
ज्ञानदीपभासितं राज्यमाल्यभूषितं
विन्ध्यमेखलायितं
सिन्धुवारिवेष्टितं
व्यास-भास-कालिदास-कीर्तिसौधमण्डितम् ।।

सर्वधर्मराजितं साम्यवादचालितं
मुक्तिसूर्यभासितं कुञ्जपुञ्जरञ्जितं
पुण्यधामशोभितं
तीर्थराजिराजितं
ख्रीष्ट-जैन-बौद्ध-हिन्दु-यावनैरुपासितम् ।।

दैवसम्पदन्वितं शूरशौर्यवन्दितं
सामदानलालितं प्रेमच्छत्रच्छादितं
दिव्यकान्तिशोभितं
भव्यभावभासितं
गान्धि-शास्त्रि-गोपबन्धु-लोकमान्य-मानितम् ।।